# महाभारतम् पाणिनीयव्याकरणम् च

**नारायणं नमस्कृत्य नरं चैव नरोत्तमम् | देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥**

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् |पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥**

**Dr.K.Shyamasundara**

**Asst. Professor, VYAKARANA, The Madras Sanskrit College, Mylapore, Chennai.600004**

## उपोद्घातः

भगवता वेदव्यासेन प्रणीतं महाभारतं संस्कृतभाषायाः सर्वश्रेष्ठं महाकाव्यम् अस्ति | **"महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते[1]"** इत्युक्तिः अस्य विषये प्रसिद्धा | कदाचित् सुरैः सर्वैः एकतः चत्वारो वेदाः, एकतः भारतं च तुलया धृतम् | तत्र सरहस्येभ्यो वेदेभ्यः भारतम् अधिकम् आसीत् | तदाप्रभृति इदं, महाभारतम् इति प्रसिद्धिमगमत् इति, उक्तेरस्याः विवरणम् अनुक्रमणिकापर्वणि दत्तम् | अत्र महत्त्वम् ग्रन्थतः आधिक्यात् |अर्थतः आधिक्याच्च भारवत्त्वम्| एवं वेदोपनिषदर्थगर्भितत्वात् **महाभारतं पञ्चमो वेदः** इति विख्यातं विलसति | **धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ॥[2]** इति वैशम्पायनोक्तेः, इदं वक्तुं शक्यते यत् लोके न कोऽपि ग्रन्थः तादृशो भवेत् यः महाभारतेन लेशतोऽपि संबद्धो न स्यात् | संस्कृते महाभारताधारितानि काव्यनाटकानि सन्ति बहूनि | न केवलं काव्यनाटकेषु, अपि तु शास्त्रेष्वपि दृश्यन्ते महाभारतविषयाः समादृताः | पाणिनीयव्याकरणेऽपि बहुत्र जनपदाः, वंशाः, चरितम् इत्येवमादयो महाभारतविषयाः उपलभ्यन्ते | ते **"महाभारतं पाणिनीयव्याकरणं च "** इत्यस्मिन् शोधपत्रे सप्रमाणं यथामति यथावकाशं च प्रस्तोष्यन्ते |

प्रकृतिप्रत्ययविभागपुरस्सरं स्वरार्थसंधिसमासादिबोधनपुरस्सरं च साधुशब्दबोधकं हि शास्त्रं व्याकरणम् | संप्रति उपलभ्यमानेषु व्याकरणेषु सर्वैः आद्रियमाणं व्याकरणं पाणिनीयमेव | तच्च त्रिमुनिव्याकरणं यद्यपि, तथापि पाणिनिव्याकरणम् इत्येव प्रसिद्धम् | पाणिनिव्याकरणे तत्तच्छब्दस्य वास्तविकार्थबोधो यथा भवेत् तथा पाणिनिना प्रक्रिया प्रदर्शिता | यथा रावणशब्दप्रक्रिया| रवणशब्दं शिवादिगणे पठित्वा तस्मात् **"शिवादिभ्योऽण्"** [४.१.११२] इति अण्प्रत्ययविधानेन निष्पादितः रावणशब्दः | एवं वैश्रवणशब्दोऽपि | तत्र काशिकाव्याख्यायां पदमञ्जर्यां "रवण-विश्रवणशब्दौ पठ्येते , तौ विश्रवःशब्दस्य आदेशौ, प्रकृत्यन्तरे वा वृत्तिविषये तत्समानार्थे, विश्रवसः अपत्यं वैश्रवणो रावणः" इत्युक्तम् | अर्थात् शिवादिगणे पठितौ यौ रवण-विश्रवणशब्दौ, तौ विश्रवशब्दस्य स्थाने आदेशत्वेन प्रवृत्तौ सन्तौ, अण्प्रत्ययस्य प्रकृती स्तः न तु स्वतन्त्रौ | अथवा स्वतन्त्रावपि तद्धितवृत्तौ केवलं विश्रवशब्दसमानार्थकौ स्तः इति | सिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्यां च स्पष्टमिदम् | अनेन रावणशब्दस्य विश्रवसः पुत्रः इत्यर्थः लभ्यते | यद्यपि 'रु' शब्दे इति धातोः ण्यन्तात् ल्युप्रत्ययेनापि रावणशब्दः व्युत्पाद्यः , परन्तु तथा व्युत्पादने रावयति = भीषयति इति रावणः इत्येव तस्यार्थः स्यात् , न तु पूर्वोक्तरीत्या विश्रवसः पुत्रः इति|

## पाणिनीयव्याकरणे महाभारतम्

एवमेव पाणिनीयव्याकरणे बहुत्र महाभारतविषयाः अपि सूत्रव्याख्योदाहरणादिषु उपलभ्यन्ते | यथा – **"कन्यायाः कनीन च"** [ ४.१.११६] इति तद्धितप्रकरणस्थं किञ्चित् सूत्रम्| अनेन कन्याशब्दात् अपत्ये अर्थे अण्प्रत्ययः, तत्सन्नियोगेन कन्याशब्दस्य 'कनीन' इत्यादेशोऽपि विधीयते | तेन कन्यायाः अपत्यं कानीनः इति सिद्ध्यति | अत्र कन्याशब्दस्य स्थाने आदेशत्वेन प्रवृत्तत्वात् कनीनशब्दः कन्यार्थको

---

[1] महाभारतम् आदिपर्व - अनुक्रमणिकापर्व.अध्यायः-१श्लोकः-३००/. ( निर्णय सागर् )

[2] तदेव, आदिपर्व - अंशावतारपर्व अध्यायः – ६२. श्लोकः-२६ निर्णयसागर्)

ज्ञेयः | एतत्सूत्रार्थविचारे भाष्यकैयटयोः – "अक्षतयोनिर्हि कन्या | अतः यदि कन्या, तर्हि न तस्या अपत्यम् , यद्यपत्यं भवति तर्हि न सा कन्या , कन्या चापत्यं चेति विप्रतिषिद्धम् इत्याक्षिप्य, या शास्त्रोक्तेन विवाहसंस्कारेण विना, पुरुषं युनक्ति सापि कन्यात्वेनैवाभिमता स्मृतिकाराणाम् | यद्वा मुनिदेवतामाहात्म्यात् या पुंयोगेऽपि अक्षतयोनिः भवति, यथा कुन्ती मन्त्राहूत-दिनकरोत्पादित-कर्णाख्यपुत्रापि पुनः कन्यैव अभूत् | तस्याः अपत्यं कर्णः कानीनशब्दवाच्यः" इत्युक्तम्[3]| एतदनुसारमेव सिद्धान्तकौमुद्यां काशिकायां च कानीनः कर्णः व्यासश्च इत्युक्तम् | व्याख्यानमिदं महाभारताश्रितं भवति| कर्णस्य व्यासस्य च उत्पत्तिः तत्रैव खलु विस्तरेण उपवर्णिता |

**कर्णोत्पत्तिः**

तथा हि – पित्रा कुन्तिभोजेन गृहे अतिथिसत्कारार्थं नियुक्तया कुन्त्या कृतेन सत्कारेण संतुष्टो दुर्वासाः मुनिः, तस्यै अनुत्तमं मन्त्रं दत्वा, **"यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि | तस्य तस्य प्रभावेण तव पुत्रो भविष्यति ॥"** इत्यवोचत् | कुन्ती च कन्या सती अपि, कौतूहलान्विता, मन्त्रस्य प्रभावं परीक्षितुं मन्त्रेण तेन, सूर्यदेवम् आजुहाव | ततः तत्रोपस्थितस्य सूर्यदेवस्य (प्रभावेण) सङ्गात् तस्याः सहज-कवचकुण्डलोपेतः तेजस्वी पुत्रः अजायत | स एव पश्चात् दानशीलः कर्ण इति विख्यातः समभवत् | एवं कर्णेन पुत्रवत्यपि सा कुन्ती सूर्यदेवस्य प्रसादात् पुनः कन्यैव अभूत् इति स्पष्टं न्यरूपि महाभारते कर्णोत्पत्तिनिरूपणावसरे |तथा च श्लोकः –

**व्यपयातु भयं तेऽद्य कुमारं प्रसमीक्षसे | मया त्वं चाप्यनुज्ञाता पुनः कन्या भविष्यसि ॥इति ,** [आदित्यवचनम्]

**अजायत सुतः कर्णः सर्वलोकेषु विश्रुतः | प्रादाच्च तस्यै कन्यात्वं पुनः स परमद्युतिः ॥ [4] इति च |**

**व्यासोत्पत्तिः**

एवमेव 'सत्यवती' इति विख्याता मत्स्यगन्धानाम्नी निषादकन्या, कन्यावस्थायां पराशरमुनिसमागमात् कृष्णवर्णमेकं पुत्रं यमुनाद्वीपे जनयामास | सत्यवतीगर्भजोऽयं बाल एव महातपस्वी सञ्जातः, कृष्णद्वैपायनः इति, वेदानां विभजनेन वेदव्यासः इति, इत्येवं बहुधा प्रसिद्धिं लेभे | जातमात्र एवायं यमुनाद्वीपे न्यस्तः | अत एव अस्य द्वैपायनः इति अन्वर्थं नाम| द्वीपम् अयनं न्यासस्थानम् यस्य सः द्वीपायनः| द्वीपायन एव द्वैपायनः इति प्रज्ञादित्वात् स्वार्थे अण्प्रत्ययः [प्रज्ञादिभ्यश्च ५.४.३८]|मत्स्यकन्येयं सुतं जनयित्वापि मुनिप्रभावात् कन्यैव अभूत्| स्पष्टं चेदम् आदिपर्वणि महाभारते सत्यवतीपराशरसंवादे | यथा -

**"विद्धि मां भगवन् कन्यां सदा पितृवशानुगाम् । त्वत्संयोगाच्च दुष्येत कन्याभावो ममानघ ॥...**

**"एवमुक्तवतीं तां तु प्रीतिमान् ऋषिसत्तमः । उवाच मत्प्रियं कृत्वा कन्यैव त्वं भविष्यसि ॥** [5] इति|

कालान्तरे सैव निषादकन्या सत्यवती, शन्तनुमहाराजस्य पत्नीत्वम् अवाप्य तस्मात् चित्राङ्गद-विचित्रवीर्यनामकौ पुत्रौ जनयामास | एवञ्च सूत्रेऽस्मिन् महाभारतकथा अस्त्येव संनिहिता इत्यत्र नास्ति संशीतिः |

**वंशः**

पाणिनिना स्वकीयसूत्रेषु शास्त्रीयकार्यविधाने अकारान्तः, अदुपधः, इत्येवमादिरीत्या सामान्यधर्मग्रहणेन लक्ष्यभूतशब्दानां निर्देशः क्रियते बहुलक्ष्यसंग्रहार्थम् | यथा **"मादुपधायाश्च मतोर्वोऽयवादिभ्यः"** [८.२.९] इति | मकारान्तात् मकारोपधात् अवर्णान्तात् अवर्णोपधाच्च उत्तरस्य मतोः व इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति इति तदर्थः | विशिष्य कस्यचित् शब्दस्य कार्यविधानापेक्षायां सत्यां साक्षात् लक्ष्यभूतशब्दस्वरूपमेव निर्दिश्यते| यथा – **"कपिबोधादाङ्गिरसे"** [४.१.१०७] इति | सूत्रस्य अयमर्थः – कपिबोधशब्दाभ्याम् आङ्गिरसे अपत्यविशेषे गोत्रे यञ्प्रत्ययो भवति इति | परिगणितसमूहस्य कार्यं यदि विधेयं तर्हि स्वकीयगणपाठस्थस्य गणस्य निर्देशः क्रियते|यथा– **"गर्गादिभ्यो यञ्"** [४.१.१०५] इति | सूत्रस्यास्य, गर्गादिगणपठितेभ्यः गोत्रापत्ये यञ्प्रत्ययो भवति इत्यर्थः | अयमस्ति पाणिनेः पन्थाः | परन्तु चतुर्थाध्याये एकं सूत्रं पठितम् **"ऋष्यन्धकवृष्णिकुरुभ्यश्च"** [४.१.११४] इति | अनेन ऋषिविशेषवाचिभ्यः अन्धकादिवंश्यवाचिभ्यश्च अपत्यार्थे

---

[3] अत्र "कन्यायाः कन्योक्तायाः कन्याभिमतायाः सुदर्शनायाः यदपत्यं स कानीनः" इति भाष्यम् |तद्व्याख्याने उद्द्योते 'सुदर्शनायाः' इत्यनेन द्वितीयपक्ष एव बोध्यते इत्युक्तं नागेशभट्टेन |

[4] महाभारतम्. आदिपर्व अध्यायः- १२०. श्लोकः- २७ , ३१. [निर्णय सागर प्रेस्]

[5] तदेव, आदिपर्व अध्यायः – ६४. श्लोकः-११७,१२०, [निर्णय सागर प्रेस्]

अणप्रत्ययो विधीयते | अत्र निर्दिष्टाः ये ऋष्यादयः शब्दाः ते न पाणिनिना गणत्वेन पठिताः| नापीदं स्वरूपग्रहणम्, अपि तु पुराणादिषु तत्त्वेन प्रसिद्धानां ग्रहणम् | तत्र अन्धकवृष्णिकुर्वादयो वंशाः महाभारते प्रसिद्धाः | तद्वंश्या एवात्र अन्धकादिशब्देभ्यो ग्राह्याः | तेन अन्धकेभ्यः अणि - श्वफल्कस्य अपत्यं पुमान् = श्वाफल्कः, रन्धसस्य अपत्यं पुमान् =रान्धसः, इत्यादयः प्रयोगाः सिद्ध्यन्ति | एवं वृष्णिभ्यः अणि - वसुदेवस्य अपत्यं पुमान् = वासुदेवः, अनिरुद्धस्य अपत्यम् = आनिरुद्धः इत्यादीनि, कुरुभ्यः अणि - नकुलस्य अपत्यं पुमान् = नाकुलः, धृतराष्ट्रस्य अपत्यं पुमान् = धार्तराष्ट्रः इत्यादीनि च उदाहरणानि | तत्र कुरुवंशः आदिपर्वणि विस्तरेण प्रतिपादितः[6]| वृष्ण्यन्धकवंशावपि तत्र प्रतिपादितौ, तथापि हरिवंशे महाभारतस्य खिलभागे –

**गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः | गान्धारी जनयामास अनमित्रं महाबलम् ॥**
**माद्री युधाजितं पुत्रं ततोऽन्यं देवमीढुषम् | तेषां वंशस्त्रिधा भूतो वृष्णीनां कुलवर्धनः ॥**
**माद्र्याः पुत्रस्य जज्ञाते सुतौ वृष्ण्यन्धकावुभौ | जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा ॥**[7]

इत्येवं विस्तरेण एतौ वंशौ उपवर्णितौ |

अत्रोक्तरीत्या श्वफल्कः वृष्णेः पुत्रः इत्यतः सूत्रस्थवृष्णिशब्देन अस्य ग्रहणं भवत्येव | श्वफल्कोऽयं महान् धर्मात्मा आसीत् | अतः सः यत्र आसीत् तत्र अनावृष्टिभयं व्याधिभयं वा न बभूव | कदाचित् काशिराजस्य देशे त्रीणि वर्षाणि यावत् अनावृष्टिः सञ्जाता | तस्मात् सः श्वफल्कं सत्कारपूर्वकं समानीय स्वस्य देशे वासयामास येन तत्र सुवृष्टिः सम्पन्ना| ततः काशिराजः स्वपुत्रीं गान्दिनीं तस्मै दत्वा विवाहं कारयामास |प्रसिद्धः श्रीकृष्णस्य प्रियः धर्मात्मा अक्रूरः अनयोः पुत्र आसीत् | तदुक्तम्– **दाता यज्वा च धीरश्च श्रुतवानतिथिप्रियः | अक्रूरः सुषुवे तस्मात् श्वफल्काद्भूरिदक्षिणः॥** इति | एवं रीत्या श्वफल्कस्य वृत्तान्तः तत्र उपवर्णितः | भाष्यकारैस्तु अन्धकवंश्यस्य उदाहरणत्वेन श्वफल्कशब्दो निर्दिष्टः भाष्ये | तेन अन्धकवंशेऽपि तन्नामा कश्चन आसीत् इति वक्तुं शक्यते, यतो हि तयोः वंशयोः समाननामानः बहवो दृश्यन्ते | सूत्रेऽस्मिन् द्वयोरपि तयोर्वंशयोर्ग्रहणात् उभयथापि श्वफल्कशब्दात् अणप्रत्ययः सिद्ध्यत्येव | प्रसिद्धौ युधिष्ठिरार्जुनशब्दावपि कुरुवंश्यवाचकौ, एवं भगवद्वाचकः कृष्णशब्दश्च वृष्णिवंश्यवाचकः | परन्तु एभ्यः शब्देभ्यः अनेन अणप्रत्ययो न भवति बाह्वादिषु पाठात् | अतः तेभ्यः **"बाह्वादिभ्यश्च"** [४.१.९६.] इति सूत्रेण इञ्प्रत्यये यौधिष्ठिरिः, आर्जुनिः, कार्ष्णिः इत्येवं रूपाणि भवन्ति | एवञ्चात्र पाणिनिः स्वकीयमिदं सूत्रं महाभारतम् अवलम्ब्य निर्ममे इति उच्येत |

एवं **"द्रोणपर्वतजीवन्तादन्यतरस्याम्"** [४.१.१०३] इति सूत्रे द्रोणशब्दस्य निर्देशो दृश्यते | अत्र सूत्रे **"गोत्रे कुञ्जादिभ्यश्च्फञ्" [४.१.९८ ]** इत्यतः गोत्रे इत्यनुवर्तते | तेन द्रोणादिभ्यः प्रातिपदिकेभ्यः गोत्रापत्ये अन्यतरस्यां फक्प्रत्ययो भवति इति सूत्रार्थः संपद्यते | द्रोणस्य गोत्रापत्यं द्रौणायनः, द्रौणिः इत्यादीनि उदाहरणानि | अत्र द्रोणशब्देन महाभारतप्रसिद्धस्य द्रोणाचार्यस्य वाचको ग्राह्यः उत अन्यः इति विचारः प्रस्तुतः | तथा हि - **"अभिव्यक्तपदार्था ये स्वतन्त्राः लोकविश्रुताः | शास्त्रार्थः तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥[8]" इति** वाक्यपदीयपद्येन यत्र सूत्रे विशिष्टरूपोपादानं भवति तत्र आधुनिकसंज्ञाशब्दाः न ग्राह्याः अपि तु अनाद्यर्थाभिधायिनः प्रसिद्धाः शब्दाः ग्राह्याः इत्युक्तम् | महाभारतप्रसिद्धस्य द्रोणाचार्यस्य वाचकः अनादिः [अस्मदाद्यज्ञातादिकालः] प्रसिद्धश्च| परन्तु तस्य ग्रहणम् अत्र कर्तुं न शक्यते | यतो हि **"अपत्यं पौत्रप्रभृति गोत्रम्"** [ ४.१.१६२] इति सूत्रेण पौत्रप्रभृत्यपत्यस्य गोत्रसंज्ञा उक्ता | द्रोणाचार्यस्य पौत्रः अप्रसिद्धः [ अर्थात् तत्पौत्रत्वेन निर्दिष्टः पुराणादिषु कोऽपि न दृश्यते ]| अश्वत्थामा तु द्रोणाचार्यस्य पुत्रः न तु पौत्रः | तस्मात् द्रोणशब्दोऽयं महाभारतप्रसिद्धद्रोणाचार्यवाचकात् भिन्नः अनादिद्रोणवाचकः ग्राह्यः | अश्वत्थाम्न्यपि क्वचित् 'द्रौणायनः, द्रोणतः प्रति'[9] इत्यादौ, द्रौणायनः इति प्रयोगो दृश्यते , स तु तस्मिन् गोत्रत्वारोपेण क्रियमाणः गौणप्रयोगः इति काशिकापदमञ्जर्यादिषु स्पष्टम् | विचारोऽयमस्ति महाभारताश्रितः |

**जनपदः**

---

[6] महाभारतम् आदिपर्व अध्यायः- ९४,९५, (नाग् पब्लिशर्स् )

[7] हरिवंशपुराणम् -I = हरिवंशपर्व. अध्यायः- ३४. श्लोकाः- १,२,३.

[8] लघुशब्देन्दुशेखरे "द्रोणपर्वत.." इत्यस्मिन्नेव सूत्रे |

[9] द्रोणपर्वत... इत्यस्मिन् सूत्रे न्यासे.

अपि च तद्धिते अपत्याधिकारे **"जनपदशब्दात् क्षत्रियादञ्"** [ ४.१.१६८.] इति किञ्चित् सूत्रम् |अनेन जनपदवाचकः सन् यः क्षत्रियवाची शब्दः तस्मात् अपत्ये अर्थे अञ्प्रत्ययो विधीयते | तत्रैकं वार्त्तिकं – **"क्षत्रियसमानशब्दात् जनपदशब्दात् तस्य राजनि अपत्यवत्"** इति | तस्य च अयमर्थः – क्षत्रियवाचकशब्देन समानशब्दो यः जनपदवाचकः, तस्मात् षष्ठ्यन्तात् राजनि अर्थे अपत्यवत् प्रत्ययाः भवन्ति इति | एवञ्च षष्ठ्यन्तात् जनपदक्षत्रियोभयवचकात् शब्दात् यथासंभवम् अपत्यम्, राजा इत्यनयोरर्थयोः एक एव प्रत्ययो भवति इति फलितम् | एतत्सूत्रादारभ्य जनपदक्षत्रियोभयवचकात् शब्दात् विधीयमानानां प्रत्ययानां तद्राजप्रत्ययाः इति नाम | तथा च सूत्रम् **"ते तद्राजाः" [४.१.१७४]** इति| तद्राजप्रत्ययविधायकानि सूत्रवर्तिकानि सन्ति अनेकानि **"साल्वेयगान्धारिभ्यां च"** [ ४.१.१६९ ] **"द्व्यञ्मगधकलिङ्गसूरमसादण्"** [ ४.१.१७०.] **"वृद्धेत्कोसलाजादाञ्ञ्यङ्"** [ ४.१.१७१.] **"पाण्डोर्ड्यण्" [वार्तिकम्] इत्यादीनि** | एवं तल्लोपविधायकानि च सन्ति सूत्राणि **बहूनि "कम्बोजाल्लुक्"[४.१.१७५] "स्त्रियामवन्तिकुन्तिकुरुभ्यश्च"** [४.१.१७६] इत्येवमादीनि | एषु सूत्रेषु , तथा अन्येषु च बहुषु सूत्रेषु उपलभ्यन्ते अनेके
जनपदवाचिनः क्षत्रियवाचिनश्च शब्दाः निर्दिष्टाः| तेषु बहवो जनपदाः क्षत्रियाश्च महाभारते प्रसिद्धाः सन्ति |

यथा पञ्चालशब्दः | अयं जनपदवाची, क्षत्रियवाची च अर्थात् तद्देशस्य राज्ञः वाचको भवति | तेन पञ्चालशब्दात् क्षत्रियवाचकत्वे **"जनपदशब्दात् क्षत्रियादञ्"** [ ४.१.१६८.] इत्यनेन सूत्रेण अपत्यार्थे अञ्प्रत्यये पाञ्चालः इति रूपम् | पञ्चालस्य अपत्यम् इति तदर्थः |एवं जनपदवाचकत्वेऽपि पूर्वोक्तवार्तिकेन अञ्प्रत्यये पाञ्चालः इत्येव रूपम् | अद्य पञ्चालानां राजा इत्यर्थः | पञ्चालापत्यस्य स्त्रीत्वविवक्षायां **"टिड्ढाणञ्...."** [४.१.१५] इति ङीपि पाञ्चाली इति सिद्ध्यति |

पञ्चालदेशस्य, तथा तद्देशस्य राज्ञां द्रुपदादीनां च वृत्तान्तः महाभारते विस्तरेण प्रतिपादित एव | पूर्वं द्रुपदेन अपमानितेन द्रोणाचार्येण, धार्तराष्ट्राणां पाण्डवानां च विद्याभ्याससमाप्त्यनन्तरं गुरुदक्षिणात्वेन पञ्चालराजस्य द्रुपदस्य जीवग्राहं गृहीत्वा आनयनम् आदिष्टम् | तदनुसारं पाण्डवाः युद्धे द्रुपदं सजीवं गृहीत्वा गुरवे समर्पितवन्तः | द्रोणश्च द्रुपदस्य अर्धराज्यं स्वाधीनं कृत्वा तं मोचयामास | तेन जातापमानो द्रुपदः द्रोणस्य हन्तारं पुत्रम् उत्पादयितुम् इच्छन् याजाख्येन मुनिना यागं कारयामास | तत्र याजेन हविषि हुते, अग्नेः देवसन्निभः कश्चित् कुमारः उत्तस्थौ | तस्य धृष्टद्युम्न इति नाम चक्रुः | ततः द्वितीयेन हविषा दिव्यरूपा काचन कुमारी समुत्पन्ना | सा च वर्णतः कृष्णा असीदित्यतः तस्याः, कृष्णा इत्येव नाम कृतम् | सैव पाञ्चाली, द्रौपदी इत्यादिनामभिः प्रसिद्धा पाण्डवानां पत्नी समभवत् | एवं वृत्तान्तवर्णने बहुत्र पञ्चालशब्दः देशपरत्वेन, राजपरत्वेन च प्रयुक्तः उपलभ्यते । यथा –

**"सोऽध्यावसद्दीनमनाः, काम्पिल्यं च पुरोत्तमम् ॥ दक्षिणांश्चापि पञ्चालान् , यावच्चर्मण्वती नदी ॥**

**द्वितीयायां च होत्रायां, हुते हविषि मन्त्रिते ॥ कुमारी चापि पाञ्चाली, वेदिमध्यात्समुत्थिता ॥[10] इत्यादि |**

अत्र प्रथमश्लोके पञ्चालान् इति बहुवचनान्ततया निर्दिष्टः पञ्चालशब्दः जनपदवाचकः| द्वितीये पञ्चालस्य पुत्री इत्यर्थके पाञ्चालीशब्दे विद्यमानः पञ्चालशब्दः क्षत्रियवाचकः |एवम् अन्येऽपि शब्दाः ज्ञेयाः |

तत्र **"पाण्डोर्ड्यण्"** इति वार्तिकेन पाण्डुशब्दात् विधीयमानः ड्यण्प्रत्ययः पूर्वोक्तरीत्या पाण्डूनां जनपदानां राजा इत्यर्थे , पाण्डुदेशराजस्य पाण्डोः अपत्यम् इत्यर्थे च भवति | तेन पाण्ड्यः इति रूपं सिद्ध्यति | अर्थस्तु पूर्वोक्त एव| अत्र पाण्डुशब्देन युधिष्ठिरपितृवाचिनः ग्रहणं न कर्तव्यम् , तस्य क्षत्रियवाचित्वेऽपि जनपदवाचित्वाभावात् | न हि युधिष्ठिरपिता पाण्डुदेशाधिपतिः अपि तु कुरुदेशाधिपतिः | एवञ्च तस्मात् पाण्डुशब्दात् अपत्यार्थे औत्सर्गिके अण्प्रत्यये पाण्डवः इति रूपम् | किञ्च युधिष्ठिरपितुर्वाचकः पाण्डुशब्दः पाण्डुवर्णरूपगुणनिमित्तकः | तदुक्तं भाष्ये प्रदीपोद्द्योतयोः- " युधिष्ठिरादिपितुः पाण्डोः अग्रहणात् तद्वाचिनः पाण्डवः इत्येव भवति | युधिष्ठिरादिपितुः वाचकस्य संज्ञाशब्दत्वेन, जनपदस्वामित्वेन तत्समानशब्दक्षत्रियजातिविशेषवाचिपाण्डुशब्दापेक्षया अस्य पाण्डुत्वगुणयोग-निमित्तकत्वेन अप्रसिद्धत्वात् इति भावः" इति [11]| युधिष्ठिरादिपितुः पाण्डुरिति संज्ञायाः निमित्तं तस्य पाण्डुवर्ण एवेति स्पष्टम् अभिहितं हि महाभारते - **व्यासः सत्यवतीपुत्रः इदं वचनमब्रवीत्**

---

[10] महाभारतम्. आदिपर्व. अध्यायः-१४८ श्लोकः-७८/७९/ & अध्यायः-१४९ श्लोकः- ५९/६०/.( निर्णय सागर् )

[11] जनपदशब्दात् [ ४.१.१६८.] इति सूत्रे भाष्ये प्रदीपोद्द्योतयोः|

**|यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह॥ तस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति |नाम चास्यैतदेवेह भविष्यति शुभानने** [12]॥ इति | तथा च पूर्वोक्तप्रदीपोद्योतव्याख्यानस्य इदं भारतवचनं मूलं भवितुमर्हति |

**सिद्धान्तग्रन्थे महाभारतम्**

न केवलं प्रक्रियाग्रन्थे , अपि तु सिद्धान्तग्रन्थेऽपि उपलभ्यते महाभारतविषयः| तथा हि - उद्योगपर्वणि विदुरबोधितनानाधर्मोऽपि शोकमोहाभितप्तः धृतराष्ट्रः **“तरति शोकमात्मवित्”** [13] इति वेदान्तवादम् उपश्रुत्य ब्रह्मविद्यया विना शोकमोहापनयनम् अशक्यं मन्वानः तां ब्रूहीति विदुरम् उक्तवान् | तदा विदुरेण योगबलेन आहूय ‘येनासौ सकलसंसारकारणधर्माधर्मविवर्जितः सुखदुःखातिगो भवेत् तं धर्मम् अस्मै धृतराष्ट्राय वदतु’ इति प्रार्थितः भगवान् सनत्सुजातः, तस्मै ब्रह्मविद्याम् उपदिदेश | उपदेशोऽयं पञ्चसु अध्यायेषु संगृहीतः व्यासाचार्यैः | अत एव उद्योगपर्वणि एकचत्वारिंशादध्यायादारभ्य षट्चत्वारिंशाध्यायपर्यन्तः षडध्यायात्मको भागः सनत्सुजातीयपर्व इति अवान्तरपर्वत्वेन व्यवह्रियते | श्रीशङ्करभगवत्पादाचार्यैः अस्य भाष्यमपि लिखितं यच्च हि सनत्सुजातीयभाष्यम् इति प्रसिद्धम् | तत्रायं श्लोकः –

**उभे सत्ये क्षत्रियाद्य प्रवृत्ते मोहो मृत्युः संमतो यः कवीनाम् |**
**प्रमादं वै मृत्युमहं ब्रवीमि सदाप्रमादममृतत्वं ब्रवीमि** [14]॥ इति |

अस्य अर्थः - केचित्तु आत्मनः मृत्युः = जननमरणादिसंसारः अस्ति इति वदन्ति , केचिच्च नास्तीति वदन्ति | तत्र कतरन्नु सत्यम् ? इति धृतराष्ट्रेण पृष्टस्य प्रश्नस्य उत्तरत्वेन पठितोऽस्त्ययं श्लोकः | सनत्सुजातोक्तिरियम् | हे क्षत्रियश्रेष्ठ ! पूर्वोक्ते मृत्योः अस्तित्वनास्तित्वे उभे अपि सत्ये | तत्र उभयोः परस्परविरुद्धयोः अस्तित्वनास्तित्वयोः सत्यत्वं कथम् इति शङ्कायां, केषाञ्चित्कवीनां मतमस्ति यत् विरोधोऽयं मृत्योः अस्तित्वनास्तित्वयोः उभयोरपि परमार्थरूपत्वे एव | मृत्युस्तु अत्र, यो मोहः = मिथ्याज्ञानम् अनात्मनि आत्माभिमानः, सः | अतो मिथ्याज्ञान-प्रापितस्य मृत्वस्तित्वस्य अवास्तवत्वात् न विरोधः इति | अहं तु न तथा ब्रवीमि , अपि तु स्वाभाविकब्रह्मभावात् प्रच्युतिं मिथ्याज्ञानस्यापि कारणं आत्मानवधारणम् = आत्माज्ञानं जननमरणादिसर्वानर्थबीजं प्रमादं मृत्युं ब्रवीमि | तथा सदा अप्रमादं = स्वाभाविकस्वरूपेण अवस्थानम् अमृतत्वं ब्रवीमि इति| (शाङ्करभाष्यानुसारी अर्थः)

## नागेशभट्टमतम्

नव्यवैयाकरणाः श्रीनागेशभट्टाः ख्यातिवादान्तरैः साकम् अद्वैतिसम्मतम् अनिर्वचनीयोत्पत्तिवादं निराकृत्य साङ्ख्यसम्मतं सदसत्ख्यातिवादं स्वाभिमतत्वेन युक्तिप्रमाणाभ्यां व्यवस्थापयन्ति स्वीयलघुमञ्जूषाग्रन्थे। तत्र अस्मात् सनत्सुजातीयभाष्यात् कश्चन अंशः अविद्याविषये स्वसंवादित्वेन प्रतिपादितः श्रीनागेशभट्टैः | यथा “सनत्सुजातीय-भाष्ये भगवत्पादैरप्युक्तं “मोहो मृत्युः” इति पद्ये ‘मोहो मिथ्याज्ञानम् अनात्मनि आत्माभिमानः | अनेन अग्रहण-अन्यथाग्रहणात्मिका अविद्या सूचिता इति | अग्रहणम् आत्मस्वरूपाग्रहणं तन्मूलकमिथ्याज्ञानात्मिका इत्यर्थः ‘ इति|

**बौद्धपदार्थः**

तथा हि - शब्दस्य हि स्ववाच्यार्थगतसत्तायामपि शक्तिरस्ति । सा च सत्ता बुद्धिनिष्ठा न तु बाह्या । एवञ्च घटादिशब्दानां सन् घट इति बुद्धिसत्ताविष्टः अर्थः भवति । अयमेव बौद्धपदार्थः इत्युच्यते । एवं बौद्धार्थस्वीकारे एव ‘घटः अस्ति’, ‘घटो नास्ति’ इत्यादिप्रयोगाः उपपद्यन्ते नान्यथा। यतो हि घटः इत्यनेनैव घटसत्तायाः अवगमेन ‘उक्तार्थानाम् अप्रयोगः’ इति न्यायात् पुनः तद्बोधनार्थम् अस्ति इति प्रयोगः अनुपपन्नः स्यात्। एवं बाह्यसत्तावति घटे बाह्यसत्ताविरहस्य बाधात् घटो नास्ति इति प्रयोगोऽपि नोपपद्येत । बौद्धार्थस्वीकारे तु घटपदबोध्यस्य बुद्धिसतो घटस्य , बाह्यसत्तायाः बोधनाय आद्ये अस्तिपदप्रयोगः । द्वितीये बुद्धिसतो घटस्य या बाह्यसत्ता, तदभावबोधनाय नास्ति इति पदस्य प्रयोगः इति अस्ति उपपत्तिः । एवं बौद्धपदार्थस्य अस्वीकारे शशशृङ्गादिपदस्य बाह्यार्थाभावेन अर्थवत्त्वाभावात् प्रातिपदिकसंज्ञा न स्यात् । तेन तदुत्तरं सुबुत्पत्तिरपि न स्यात्। एवञ्च बौद्धपदार्थः अवश्यं स्वीकार्यः।

---

12 महाभारतम्. आदिपर्व, अध्यायः-११५.श्लोकः-२४,२५.( निर्णय सागर् )

13 छान्दोग्योपनिषत्. ७.१.३

14 महाभारतम्.उद्योगपर्व अध्यायः- ४२. श्लोकः-४. (संमतोऽयं , तथाऽप्रमादम् इति पाठः- निर्णय सागर्)

**सदसत्ख्यातिवादः**

'इदं रजतम् ' इति भ्रमस्थले ईदृशं बौद्धं रजतमेव पुरोवर्त्तिनि शुक्तौ गृह्यते । तत्र ज्ञानप्रक्रिया तु प्रायः वेदान्तिमतोक्तरीत्यैव भवति । तथा हि – अन्तःकरणस्य वृत्तिः चक्षुरादिकरणद्वारा बहिः निर्गच्छति । सा च वृत्तिः द्रव्यरूपा , सावयवा , रजतसंस्कारवती च । तस्याः पुरोऽवस्थितपदार्थसम्बन्धे जाते , तद्गतचाकचक्यादिदोषवशात् रजतसंस्कारोद्बोधो जायते । ततः तादृशसंस्कारवशात् रजतसम्बन्धाभावेऽपि पुरोवर्त्तिशुक्तिरूपविषयावच्छेदेन अन्तःकरणं रजताकारतया परिणमते । सा वृत्तिः रजताकारपरिणाममादाय रजताकारविशिष्ट-इदमाकारा भवति । इयमेव अन्तःकरणवृत्तिः भ्रम इत्युच्यते । तथा च चित्तवृत्तिपरिणामरूपस्य बहिरसतः बौद्धस्य रजतस्य , विषये आरोपः
इति फलितम् । एवम् आरोप्यमाणं रजतं बहिः नास्ति इत्यतः असत् इत्युच्यते ।

'नेदं रजतम्' इति बाधज्ञानोदयपर्यन्तं रजतं बहिः सत्वेन प्रतीयते । सा च प्रतीतिः अधिष्ठानगतसत्त्वस्य तत्र आरोपात् भवति । इत्थं च आरोपितं सत्त्वम् अनारोपितं च बहिरसत्त्वम् । अत एव सत्त्वासत्त्वयोः समावेशः सम्भवति । अनारोपितयोः सत्त्वासत्त्वयोरेव विरोधेन, समावेशासम्भवः । तस्मात् 'इदं रजतम्' इति अध्यासः, भ्रमो वा सदसत्ख्यातिः भवति, न तु अनिर्वचनीयख्यातिः। उक्तं च साङ्ख्यसूत्रे **"सदसत्ख्यातिः बाधाबाधाभ्याम्"** [15] इति । विशेषदर्शनं यावत् अबाधात् सत् । तदन्तरं च बाधात् असत् । तस्मात् भ्रमे सदसतः ख्यातिः भवति इति तदर्थः ।

भ्रमे असत एव भानम् इत्येव महाभाष्यकाराणाम् अप्यभिप्रायः । तदुक्तं "स्त्रियाम्" [४.१.३] इति सूत्रे भाष्ये- "असत्तु खट्वावृक्षयोः लिङ्गं द्रष्टव्यम् । कथं पुनः असल्लिङ्गं द्रष्टुं शक्यम् ? मृगतृष्णावत् । तद्यथा – मृगाः तृषिताः अपां धाराः पश्यन्ति , न च ताः सन्ति । यथा गन्धर्वनगराणि दूरतो दृश्यन्ते , उपसृत्य च नोपलभन्ते ।" इति । भर्तृहरिणाप्युक्तम् –

**" यथा सलिलनिर्भासो मृगतृष्णासु जायते । जलोपलब्ध्यनुगुणाद्बीजात् बुद्धिर्जलेऽसति ॥ [16]"** इति ।

अत्र बीजशब्देन पूर्वपूर्वमिथ्याज्ञानजन्यवासना उक्ता इति तद्व्याख्यातारो वदन्ति । भ्रम एव अविद्यापदेन व्यपदेश्यः। सूक्ष्मा स्थूला चेति अविद्या द्विविधा । पूर्वपूर्वभ्रमजन्यसंस्कारः = भ्रमजन्यवासना सूक्ष्मा । तज्जन्या भ्रमरूपा स्थूला । एतत्सृष्टौ जन्मानुपलम्भात् सूक्ष्माविद्यायाः नित्यत्वमुच्यते | भ्रमवासनातिरिक्ता दण्डायमना अविद्या नास्त्येव , प्रमाणाभावात् इति | एवं रीत्या स्वमतम् उपस्थाप्य उपोद्बलकत्वेन ब्रह्मसूत्रभाष्यादिभिः साकं पूर्वोक्तरीत्या सनत्सुजातीयभाष्यमप्युपन्यस्तम् | तेन च 'अग्रहणान्यथाग्रहणात्मिका अविद्या' न तु तद्भिन्ना कापि इति यत् स्वमतं तदेव शङ्करभगवत्पादादीनामपि संमतम् इति तदभिप्रायः [17]|

**उपसंहारः**

एवञ्च व्याकरणेऽपि विवरणार्थं महाभारतस्य आश्रीयमाणत्वात् **इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्| बिभेत्यल्पश्रुताद्वेदो मामयं प्रत(ह)रिष्यति** [18]॥ इतीदं महाभारतवचनं न केवलं वेदविषयकम् अपि तु वेदाङ्गविषयकपि इति भाति|

**इति शम्**

## उपयुक्तग्रन्थसूची


श्रीशङ्कराचार्यग्रन्थावली - प्रथमो भागः, ईशादिदशोपनिषदः शाङ्करभाष्यसहिताः, (१९६३) प्रथमं संस्करणम्. मोतिलाल् बनारसीदास्, दिल्ली

श्रीहरिवंशपुराणम् - महर्षिवेदव्यासप्रणीतम्, पण्डितरामनारायणदत्तशास्त्री पाण्डेयकृत-


[15] साङ्ख्यसूत्रम् – ५.५६.

[16] वाक्यपदीयम् , लिङ्गसमुद्देशः. श्लो० सं० ८.

[17] वैयाकरणसिद्धान्तलघुमञ्जूषा – I पृ-४३१. (अत्र उक्तविषयस्य महाभारतेन सह साक्षात्संबन्धाभावेऽपि भाष्यद्वारकः संबन्धः अस्त्येवेति ज्ञेयम् )

[18] महाभारतम्. आदिपर्व अनुक्रमणिकापर्व अध्यायः -१. श्लोकः - २९३/२९४/ ( निर्णय सागर् ) । श्लोकः - २६७/२६८/ नाग् पब्लिशर्स्)

हिन्दीटीकासहितम्, (महाभारतस्य खिलभागः) अष्टमं संस्करणम् (सं २०५२) गोविन्दभवनकार्यालयः - गीता प्रेस् , गोरखपुर्.

श्रीमन्महाभारतम् – चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचितभारतभावदीपाख्यटीकया समेतम् डा० मण्डनमिश्रप्रणीतया भूमिकया सनाथितम् । नाग् पब्लिशर्स्, दिल्ली. (१९८८) Reprint. (9 Vols Set)

श्रीमन्महाभारतम् – महर्षिवेदव्यासप्रणीतम्, The South Indian Edition, Edited by T.R. Krishnacharya & T.R.Vyasacharya MadhvaVilas Book Depot, Kumbakonam (1906) NIRNAYA SAGAR PRESS, Bombay.

ख्यातितत्वसमीक्षा - By Nyaya Vedanta Vagisha-Shastraratnakara-Panditaraja V Subrahmanya Sastri, Tiruchi -Advaita Sabha Series No. 4. (1982) Published By A Venkateswaran, Advaita Sabha Tiruchi.

वैयाकरणसिद्धान्तलघुमञ्जूषा – श्रीमन्नागेशभट्टविरचिता कलाकुञ्जिकासरलाख्यटीकात्रयसहिता | सम्पादकः- आचार्यश्रीरामप्रसादत्रिपाठी। (१९९०) प्रथमं संस्करणम्। गङ्गानाथझा-ग्रन्थमाला। संपूर्णानन्दसंस्कृतविश्वविद्यालयः , वाराणसी|

वैयाकरणसिद्धान्तकौमुदी – श्रीमद्भट्टोजिदीक्षितप्रणीता ।बालमनोरमा-तत्त्वबोधिनी-लघुशब्देन्दुशेखरसहिता । सम्पादकाः- श्रीगुरुप्रसादशास्त्री, श्रीसीतारामशास्त्री, प्रो.बालशास्त्री च। (2012) प्रथमं संस्करणम् । चौखम्बा सुरभारती प्रकाशनम् ,वाराणसी.

लघुसिद्धान्तकौमुदी – श्रीवरदराजप्रणीता ।श्रीभीमसेनशास्त्रिकृतभैमीव्याख्योपेता ।(२०१०) षष्ठं संस्करणम्। भैमी प्रकाशन् , दिल्ली.

काशिका – वामनजयादित्यविरचिता । न्यासपदमञ्जरीभावबोधिनीव्याख्यासहिता । प्राच्यभारतीग्रन्थमाला – १७ (१९८५) सम्पादकौ - डा० जयशङ्कर लाल त्रिपाठी , डा० सुधाकर मालवीयश्च । तारा प्रिंटिंग वर्क्स. वाराणसी.

लघुशब्देन्दुशेखरः – श्रीमन्नागेशभट्टविरचितः। श्रीभैरवमिश्रविरचितचन्द्रकलाटीकासहितः। सम्पादकः – पण्डितगोपालशास्त्री नेने। श्री काशी संस्कृतग्रन्थमाला – ५. द्वितीयं संस्करणम् (१९८७) चौखम्बा संस्कृत संस्थान , वाराणसी .

पातञ्जलं महाभाष्यम् – श्रीमद्भगवत्पतञ्जलिमुनिविरचितम् । प्रदीपोद्योतसहितम् । सम्पादकः - पण्डितश्रीगुरुप्रसादशास्त्री श्रीगुरुप्रसादशास्त्रिग्रन्थमालायाः प्रथमं पुष्पम् ।(१९८७) द्वितीयं संस्करणम्- सम्पादकः- डा० बालशास्त्री। वाणीविलास प्रकाशन् , वाराणसी .

INDIA AS KNOWN TO PANINI – By V.S.Agrawala. A Study of the cultural material in the Ashtadhyayi University of Lucknow. 1953

वाक्यपदीयम् - आचार्यभर्तृहरिप्रणीतम्। काण्डम्-३, भागः -२ . प्रकाश-अम्बाकर्त्रीव्याख्या-द्वयोपेतम्, डा० मण्डनमिश्रस्य प्रस्तावनया सहितं च। सम्पादकः – पद्मश्रीः पण्डितश्रीरघुनाथशर्मा। (१९९७) द्वितीयं संस्करणम्।सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी ।